अनुक्रमांकः ..................................
निरीक्षकस्य हस्ताक्षरम् ............

**Paper Code**
**BC 104**

# पतञ्जलिविश्वविद्यालयः

## परीक्षा - दिसम्बरमासः - 2017

## एक वर्षीय सहायक पाठ्यक्रम (सत्रम् - प्रथमम्)
## संस्कृत (चतुर्थपत्रम्)
## वैदिक सिद्धान्त परिचय (खण्ड - एक)

**समयः - होरात्रयम्** **अधिकतमाङ्काः - 75**

---

**निर्देशः** अस्य प्रश्नपत्रस्य पञ्चसप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'अ' 'ब' 'स' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

## खण्डः-अ
### (दीर्घोत्तराः प्रश्नाः)

**सूचना** : 'अ' खण्डे पञ्च दीर्घोत्तराः प्रश्नाः दत्ताः सन्ति, तेषु त्रयाणाम् उत्तरं दीयताम् । प्रत्येकं प्रश्नस्य कृते पञ्चदश अङ्काः निर्धारिताः सन्ति। (3×15=45)

1. "नामकरण-उपनयन-वेदारम्भ-वानप्रस्थ" इति संस्काराणां संक्षेपेण परिचयं लिखन्तु।
2. ऋग्वेदयजुर्वेदयोः प्रतिपाद्यविषयं विस्तारेण लिखन्तु।
3. कति वर्णानि भवन्ति कानि-कानि च, तेषां सर्वेषां कर्त्तव्यानि प्रकाशयन्तु।
4. आस्तिकदर्शनानि कति कानि-कानि च भवन्ति, सर्वेषां संक्षेपेण परिचयं लिखन्तु।
5. ईशोपनिषदः कठोपनिषदः च प्रतिपाद्यविषयं लिखन्तु।

## खण्डः-'ब'
### (लघुत्तराः प्रश्नाः)

**निर्देशः** 'ब' खण्डे षड्लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवलं चत्वारः एव प्रश्नाः समाधेयाः। (4×5=20)

1. ईश्वरस्य स्वरूपं किमिति संक्षेपेण लिखेयुः ।
2. कर्मफलव्यवस्थायाः वर्णनं संक्षेपेण लेखनीयम् ।
3. पुरुषार्थचतुष्टयं किमिति? स्पष्टं कुर्वन्तु ।
4. सामवेदस्य अथर्ववेदस्य च परिचयः संक्षेपेण करणीयः ।
5. आश्रमाणां परिचयः संक्षेपेण लेखनीयः ।
6. ब्रह्मयज्ञस्य अतिथियज्ञस्य च वर्णनं संक्षेपेण करणीयम् ।

# खण्डः–स

## (अतिलघुत्तराः प्रश्नाः)

**सूचना :** 'स' खण्डे दश अतिलघूत्तराः प्रश्नाः दत्ताः सन्ति। प्रत्येकं प्रश्नस्य कृते एकैकोऽङ्को निर्धारितोऽस्ति। एतस्य खण्डस्य सर्वे प्रश्नाः अनिवार्याः सन्ति। **(10×1=10)**

**1.** कति उपवेदाः, किं च तेषां नाम ?

**2.** सर्वेषां संस्काराणां केवलं नामोल्लेखनं कुर्वन्तु ?

**3.** शतपथब्राह्मणः कस्य वेदस्य ब्राह्मणग्रन्थो वर्तते ?

**4.** त्रैतवादस्य किं तात्पर्यं नाममात्रं लिखन्तु ?

**5.** वेदाः पौरुषेयाः अपौरुषेयाः वा ?

**6.** ईश्वरः साकारो निराकारो वा ?

**7.** जीवात्मा एको वा अनेको वा ?

**8.** रक्षणं कस्य वर्णस्य कर्त्तव्यं वर्त्तते ?

**9.** ईशोपनिषद् कस्य वेदस्य शाखा वर्तते ?

**10.** सांख्यदर्शनस्य प्रणेता कोऽस्ति ?

--------------x--------------